## कौरव्यमाण्डूकाभ्यां च । (१९/४७७)

कौरव्य माण्डूक इत्येताभ्यां [1]स्त्रियां ष्फः प्रत्ययो भवति। कुर्वादिभ्यो ण्ये (४.१.१५१/११७५) कृते, 'ढक् च मण्डूकात्' (४.१.११९/११२२) इत्यणि च। [2]यथाक्रमं टाबङीपोरपवादः। कौरव्यायणी। माण्डूकायनी। कथं कौरवी सेना ? तस्येदं (४.३.१२०/१५००) विवक्षायामणि कृते भविष्यति।

[३४०] कौरव्यमाण्डूकयोरासुरेरुपसङ्ख्यानम्। (म. भा.२.२१०)

आसुरायणी[3]। शैषिकेष्वर्थेषु 'इञश्च' (४.२.११२/१३३३) इत्यणि प्राप्ते छप्रत्यय इष्यते। आसुरीयः [4]कल्पः (म. भा. २.२११) ॥

## वयसि प्रथमे। (२०/४७८)

[5]कालकृतशरीरावस्था यौवनादिः वयः। प्रथमे वयसि यत् प्रातिपदिकं श्रुत्या वर्तते ततः स्त्रियां ङीप् प्रत्ययो भवति। कुमारी। किशोरी। [6]बर्करी। प्रथमे इति किन् ? स्थविरा। वृद्धा। अतः इत्येव, शिशुः।

[३४१] वयस्यचरम इति वक्तव्यम्। (म. भा. २. २११)

वधूटी। [7]चिरण्टी। द्वितीयवयोवचनावेतौ। प्राप्तयौवना स्त्री अभिधीयते। कथं कन्या ? 'कन्यायाः कनीन च' (४.१.११६/१११९) इति ज्ञापकात्। [8]उत्तानशया, लोहितपादिका [9]इति ? नैताः वयःश्रुतयः॥

## द्विगोः। (२१/४७९)

[10]द्विगुसञ्ज्ञकात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति। पञ्चपूली। दशपूली। कथं त्रिफला[11] ? अजादिषु [12]दृश्यते॥

## अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि। (२२/४८०)

पूर्वेण [13]ङीप् प्राप्तः प्रतिषिध्यते। अपरिमाणान्तात् द्विगोः बिस्तआचितकम्बल्यान्ताच्च तद्धितलुकि सति ङीप् प्रत्ययो न भवति। बिस्तादीनां परिमाणार्थं ग्रहणम्। सर्वतो [14]मानं परिमाणम्। अपरिमाणान्तात् तावत् – पञ्चभिरश्वैः क्रीता पञ्चाश्वा। दशाश्वा[15] (५.१.३७/१७०२) (५.१.२८/१६९३)। कालः च सङ्ख्या [16]न परिमाणम्। [17]द्विवर्षा। त्रिवर्षा (५.२.३७/१८३८ वा.)। [18]द्वाभ्यां शताभ्यां क्रीता द्विशता। त्रिशता। (५.१.२२/१६८७) (५.१.२८/१६९३)। बिस्तादिभ्यः – द्विबिस्ता। त्रिबिस्ता (५.१.५२/१७१८) (५.१.२८/१६९३)। द्व्याचिता। त्र्याचिता (५.१.५४/१७२०) (५.१.२८/१६९३)। द्विकम्बल्या। त्रिकम्बल्या (५.१.३७/१७०२) (५.१.२८/१६९३)। [19]अपरिमाणेति किम् ? द्व्याढकी। त्र्याढकी। तद्धितलुकि इति किम् ? समाहारे[20] – पञ्चाश्वी। दशाश्वी॥

---

1. स्त्रियां नास्ति फ. 2. यथासंख्यम् ब. 3. कन्या इत्यधिकम् ह. 4. कल्पः नास्ति क. 5. कालकृता ब. ड. इ. 6. बर्करी नास्ति ह. 7. चिरण्डी ह. 8. कथं इत्यधिकम् क. ड. फ. 9. द्विवर्षा इत्यधिकम् क. 10. द्विगुसमासात् क. ड. फ. 11. इति इत्यधिकम् ह. 12. पठ्यते क. फ, इष्यते ब, पाठः करिष्यते ह. 13. प्राप्तः ङीप् ब. 14. माने ब. 15. तेन क्रीतमिति ठक्। अध्यर्धपूर्वाद् द्विगोर्लुक् इति लुक् इत्यधिकम् अ. ब. क. ह. 16. न नास्ति क. 17. द्विवर्षा स्त्री क. ड, त्रिवर्षा स्त्री क. 18. द्वाभ्यां शताभ्यां क्रीता नास्ति इ. ड. 19. अपरिमाणाद् इति ब. ग. ह, अपरिमाणादित्येव इ. 20. मा भूत् इत्यधिकम् क. ड. फ.